[(1) KYV TB 2-6-5-2&3 ; (2) TS 1-7-10-3 ; (3) TB 3-5-10-4&5 ; (4) TB 2-6-6-3&4]

ॐ दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे । अ॒श्विनो᳚र्बा॒हुभ्या᳚म् ।

ॐ dēvas’yat’ tvā savitu[fp]’ prasavē ।

aśh’vinōōr’bāhubh’yāām ।

पू॒ष्णो हस्ता᳚भ्याम् । अ॒श्विनो॒र्भैष॑ज्येन ।

pūṣh’ṇō has’tāābh’yām । aśh’vinōr’bhaiṣhaj’yēna ।

तेज॑से ब्रम्हवर्च॑साया॒भिषि॑ञ्चामि । दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे ।

tējasēb’ bram’havar’chasāyābhiṣhiñ’chāmi ।

dēvas’yat’ tvā savitu[fp]’ prasavē ।

अ॒श्विनो᳚र्बा॒हुभ्या᳚म् । पू॒ष्णो हस्ता᳚भ्याम् ।

aśh’vinōōr’bāhubh’yāām । pūṣh’ṇō has’tāābh’yām ।

सर॑स्वत्यै भैष॑ज्येन । वी॒र्या॑या॒न्नाद्या॑या॒भिषि॑ञ्चामि ।

saras’vat’yai bhaiṣhaj’yēna ।

vīr’yāyān’nād’yāyābhiṣhiñ’chāmi ।

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे । अ॒श्विनो᳚र्बा॒हुभ्या᳚म् ।

dēvas’yat’ tvā savitu[fp]’ prasavē ।

aśh’vinōōr’bāhubh’yāām ।

पू॒ष्णो हस्ता᳚भ्याम् । इन्द्र॒स्येन्द्रि॒येण॑ ।

श्रि॒यै यश॑से ब॒लाया॒भिषि॑ञ्चामि ॥ १ ॥

pūṣh’ṇō has’tāābh’yām । in’dras’yēn’driyēṇa ।

śhriyai yaśhasē balāyābhiṣhiñ’chāmi ॥ 1 ॥ (1)

www.saiveda.net

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे᳚ऽश्विनो᳚र्बा॒हुभ्यां᳚ पू॒ष्णो हस्ता᳚भ्या॒ꣳ॒ सर॑स्वत्यै
वा॒चो य॒न्तुर्य॒न्त्रेणा॒ग्नेस्त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चा॒मीन्द्र॑स्य त्वा॒
साम्रा᳚ज्येना॒भिषि॑ञ्चामी॒ बृह॒स्पते᳚स्त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चामि ॥ २॥

dēvas'yat' tvā savitu[fp]'
prasavēē (a)śh'vinōōr'bāhubh'yaām'
pūṣh'ṇō has'taābh'yāgm' saras'vat'yai
vāchō yan'tur'yan'trēṇāg'nēs'tvā
sām'rāāj'yēnābhiṣhiñ'chāmīn'dras'yat' tvā
sām'rāāj'yēnābhiṣhiñ'chāmi bṛhas'patēēs'tvā
sām'rāāj'yēnābhiṣhiñ'chāmi ‖ 2 ‖ (2)

आयु॒राशा᳚स्ते । सु॒प्र॒जा॒स्त्वमाशा᳚स्ते ।
āyurāśhaās'tē | sup'rajās'tvamāśhāās'tē |

स॒जा॒त॒व॒न॒स्यामाशा᳚स्ते । उत्त॑रां देवय॒ज्यामाशा᳚स्ते ।
sajātavanas'yāmāśhāās'tē |
ut'tarān' dēvayaj'yāmāśhāās'tē |

भूयो॑ ह॒विष्क॑र॒णमाशा᳚स्ते । दि॒व्यं धामाशा᳚स्ते । विश्वं॑ प्रि॒यमाशा᳚स्ते ।
bhūyō haviṣh'karaṇamāśhāās'tē |
div'yan' dhāmāśhāās'tē | viśh'vam' priyamāśhāās'tē |

यद॒नेन॑ ह॒विषाऽऽशा᳚स्ते । तद॑श्या॒त्तदृ॑ध्यात् ।
तद॑स्मै दे॒वा रा॑सन्ताम् ॥ ३॥
yadanēna haviṣhā (ā)śhāās'tē | tadaśh'yāt'tadṛd'dhyā-te |
tadas'mai dēvā rāsan'tām ‖ 3 ‖ (3)

www.SaiVeda.net

द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव ।

drupadādivēn’mumuchānaḥa ।

svin’nas’ snāt’vī maladiva ।

पूतं पवित्रेणेवाऽऽज्यम् । आपः शुन्धन्तु मैनसः ॥४॥

pūtam’ pavit’rēṇēvā (ā)j’yam’m ।

āpaśh’ śhun’dhan’tu mainasaḥa ॥ 4 ॥ (4)

भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः ।

bhūr’bhuvas’suvō bhūr’bhuvas’suvō

bhūr’bhuvas’suvaḥa ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www Sai Veda net